# Renuka Stotram Vasudevananda Sarasvati Kritam

# રેણુકાસ્તોત્રં શ્રીવાસુદેવાનન્દસરસ્વતીકૃતમ્

## Document Information

Text title : reNukAstotraM vAsudevAnandavirachitam 2

File name : reNukAstotramvAsudevAnanda2.itx

Category : devii, reNukA, stotra, vAsudevAnanda-sarasvatI, devI

Location : doc_devii

Author : Vasudevananda Saraswati

Transliterated by : Kaushal S. Kaloo kaushalskaloo at gmail.com

Proofread by : Kaushal S. Kaloo kaushalskaloo at gmail.com

Description-comments : First one is reNukAstotrammAtApuravAsinI

Latest update : June 18, 2013

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# રેણુકાસ્તોત્રં શ્રીવાસુદેવાનન્દસરસ્વતીકૃતમ્

શ્રીગણેશાય નમઃ ।

ઐન્દ્યાદિવન્દિતપતે વરદેઽભીષ્ટકામદે ।
કામદેવર્ચિતેઽનન્તે રેણુકેઽમ્બ નમોઽસ્તુ તે ॥

એકવીરે નિજાધારે રુચિરે સજ્જનાદરે ।
ઉદરે રેણુસઞ્જાતે રેણુકેઽમ્બ નમોઽસ્તુ તે ॥

કરુણારસસમ્પૂર્ણે નયને સુસ્મિતાનને ।
શોભને પાહિ નો ભીતે રેણુકેઽમ્બ નમોઽસ્તુ તે ॥

વીરમાતર્મહાદેવી ત્વદન્યા કા પરા ભુવિ ।
તારિણીદુર્ગતોઽનન્તે રેણુકેઽમ્બ નમોઽસ્તુ તે ॥

રામમાતર્મહામાયે જમદગ્નિપ્રિયાઽભયે ।
વિજયે વેદવિનુતે રેણુકેઽમ્બ નમોઽસ્તુ તે ॥

યૈરર્ચિતે તવ પદે તે ધન્યાઃ પરમે પદે ।
નિહિતાસ્તે સુરનુતે રેણુકેઽમ્બ નમોઽસ્તુ તે ॥

ન ત્વદન્યાગતિર્દેવિ પરમા ખલુ શામ્ભવિ ।
ભુક્તિમુક્તિપ્રદે શાન્તે રેણુકેઽમ્બ નમોઽસ્તુ તે ॥

યઃ કેશવેશ્વરશ્ચાપિ સૃષ્ટિ-સ્થિત્યન્તકારિણઃ ।
પ્રસાદાદેવ તેઽનન્તે રેણુકેઽમ્બ નમોઽસ્તુ તે ॥

જગદમ્બે નમોઽસ્તુ રેણુકે પરિપાહીશ્વરિ  નઃ સુભાવુકે ।
જય-લાભ-યશઃપ્રદે મુદે સ્તુતિરેષાસ્તુ તવાખિલાર્થદે ॥

નાવાહનં નાર્ચન પદ્ધતિં તે
　　જાને ન ભક્તિં ત્વયિ મે ભવાન્તકે ।
અથાપિ માં ત્વં કુલદેવિભક્તં

કુલોદ્ભવં પાહ્યપિ ચાર્થસક્તમ્ ॥

માતાપુરનિવાસિન્યાઃ શ્રીદેવ્યાઃ સ્તોત્રમુત્તમમ્ ।
યઃ પઠેત્પ્રયતો ભક્ત્યા સર્વાન્ કામાન્ સ આપ્નુયાત્ ॥

ઇતિ શ્રીવાસુદેવાનન્દસરસ્વતીપણ્ડિતવિરચિતં શ્રીરેણુકાસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded and proofread by Kaushal S. Kaloo kaushalskaloo at gmail.com

---

*Renuka Stotram Vasudevananda Sarasvati Kritam*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*